# व्याकरणमाहात्म्यम्

व्याक्रियन्ते व्युत्पाद्यन्ते प्रकृतिप्रत्ययविभागपूर्वकं विविच्य अपशब्देभ्यः साधुशब्दाः पृथक्क्रियन्ते अनेनेति विग्रहात् साधुशब्दज्ञानजनकं सूत्रात्मकं लक्ष्यलक्षणात्मकं वा व्याकरणम्। अस्यापरं नाम शब्दानुशासनमिति। महाभाष्ये सर्वादौ 'अथ शब्दानुशासनम्' इत्युक्तमस्ति। तत्र शब्दानुशासनमित्यस्य व्याख्यानं कुर्वता प्रदीपटीकाकृता कैयटेनोक्तं 'व्याकरणस्य चेदमन्वर्थं नाम शब्दानुशासनमि'ति। एतन्मतं स्पष्टीकुर्वता नागेशेनोच्यते 'अन्वर्थत्वात् प्रयोजनाभिधानोपपत्तिः'। अनुशिष्यन्ते असाधुशब्देभ्यो विविच्य ज्ञाप्यन्ते अनेनेति करणल्युडन्ततया शास्त्रपदेन समानाधिकरण्यमिति भावः। व्याकरणपदार्थनिरूपणप्रसङ्गे भाष्यकृता पतञ्जलिना महाभाष्ये पस्पशाह्निके सूत्रात्मकं लक्ष्यलक्षणात्मकञ्च व्याकरणमिति प्रतिपादितम्। अस्य व्याकरणस्यादिप्रवक्ता ब्रह्मा इति श्रूयते। तथाहि ब्रह्मा बृहस्पतये प्रोवाच, बृहस्पतिरिन्द्राय, इन्द्रो भरद्वाजाय, भरद्वाज ऋषिभ्यः, ऋषयो ब्राह्मणेभ्य इति ऋक्तन्त्रे उक्तम्। व्याकरणस्य प्रथमसंस्कर्ता इन्द्र एव।

व्याकरणं खलु वेदाख्यस्य ब्रह्मण उपकारकं भवति। किञ्च, अदृष्टफलजनकानां ब्रह्मचर्याधःशयनादीनां तपसां तपोलक्षणं व्याकरणं दृष्टादृष्टोभयफलजनकतया प्राशस्त्यं भजते। तथाह्युक्तं भर्तृहरिणा वाक्यपदीये-

'आसन्नं ब्रह्मणस्तस्य तपसामुत्तमं तपः।

प्रथमं छन्दसामङ्गं प्राहुर्व्याकरणं बुधाः'।। इति।

शब्दानुशासनशास्त्रे शब्दानामेव प्रतिपाद्यविषयत्वं नेतरेषामिति सर्वथा मनसि निधातव्यम्। शाब्दे ज्ञाने सत्येव अर्थाः प्रतीयन्ते। शब्दान् व्यतिरिच्य अनुच्चार्य वा न कश्चित् व्यवहर्तुमलं कृत्सानामपि व्यवहाराणां शब्दमूलकत्वात्। शब्दानाञ्च साध्वसाधुबोधो व्याकरणादेव जायते। अतो व्याकरणं शब्दानां यथार्थबोधकत्वेन माहात्म्यं भजते। तथाहि निगदितं वाक्यपदीये-

'अर्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धनम्।

तत्त्वावबोधः शब्दानां नास्ति व्याकरणादृते'।। इति।

वैयाकरणानां नये साधुशब्दज्ञानपूर्वकं प्रयोगद्वारा त्रिविधदुःखस्यात्यन्तिकनिवृत्तिलक्षणोऽपवर्गो लब्धुं शक्यते इत्यतः तस्यापवर्गद्वारत्वं सिध्यति। उच्यते च वाक्यपदीये-

'तद्द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम्।

पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते'।। इति।

भाषया सह व्याकरणस्य वर्तते अयुतसिद्धसम्बन्धः। यथा व्याकरणं विना भाषाया, भाषामृते च व्याकरणस्य वा नास्ति स्थितिः। अतो भाषाव्याकरणयोर्नित्यसम्बन्धः। सार्थकः शब्दो हि पदार्थबोधाय व्यवहृतो भवति। शाब्दबोधाय प्रथमतया शब्दोच्चारणम्, उच्चारितशब्दस्य श्रवणं, ततोऽर्थनिश्चयः। अत एव शाब्दबोधाय शक्तिग्रहः आवश्यकः। शक्तिग्रहोपायेषु व्याकरणमन्यतमोपायत्वेन ग्रहीतम्। अत उच्यते-

शक्तग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च।

वाक्यस्य शेषाद् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः॥इति

ननु 'श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः' इति स्मृतेः श्रुतिवाक्यश्रवणजन्यं शब्दब्रह्मज्ञानम् अपवर्गलाभाय अलं, न तु व्याकरणजन्यम्। किञ्च, शक्तिग्रहस्य न तदपेक्षा कोषकाव्यादित एव तदुपपत्तेः इत्यतः न तदपवर्गद्वारत्वमिति चेन्मैवम्। वस्तुतस्तु घटाद्यर्थेषु घटत्वजातयः समवेताः, तासां च घटत्वजातीनां बोधः घटादिशब्देषु समवेतानां शब्दत्वजातीनामाश्रयेण सम्भवति। अतो घटत्वजातीनां शक्यत्वं तथा शब्दत्वजातीनां शक्यत्वमित्यत उभयोः प्रतिपाद्यप्रतिपादकत्वसम्बन्धोऽनुमीयते। तस्मात् कोशकाव्यादिसर्वविद्यानां स्वघटकपदशक्तिग्रहाय व्याकरणमपेक्षणीयम्। किञ्च, लोकायतसामर्थ्यः शब्दो वेदेऽपि बोधक इति न्यायात् वैदिकशब्दशक्तिग्रहस्य व्याकरणाधीनत्वमिति श्रुत्यापि तदपेक्षणीयं भवति इत्यतोपवर्गद्वारत्वं व्याकरणस्य सिद्धमेव। तदुक्तं वाक्यपदीये-

यथार्थजातयः सर्वाः शब्दाकृतिनिबन्धनाः।

तथैव लोके विद्यानामेषा विद्या परायणम्॥ इति।

न केवलं शक्तिग्रहाय अपेक्षितत्वादेव व्याकरणस्य अपवर्गद्वारत्वमपि तु साक्षात् शब्दब्रह्मसाक्षात्कारजनकत्वेनापि तस्यास्ति प्रसिद्धिः।

भगवद्वेदपुरुषस्य मुखरूपत्वादिकं सर्वेष्वङ्गेषु मुख्यमस्ति व्याकरणम्। अत एव भगवता पतञ्जलिना स्वकीये महाभाष्ये उक्तं – 'प्रधानञ्च षट्ष्वङ्गेषु व्याकरणमि'ति। काव्यकोविदाः, नैयायिकाः, वैदान्तिकाः, मीमांसका वान्ये शास्त्रकारा व्याकरणं विहाय न किमपि कर्तुं प्रभवन्ति। 'तदधीते तद्वेद' इति सूत्रवचनात् सर्वेऽपि शास्त्रकारा व्याख्याकाराश्च वैयाकरणाः इति वक्तुं शक्यन्ते। आनन्दवर्धनः प्रथमे विद्वांसो वैयाकरणाः इति कथयन्ति। एवं व्याकरणस्य महत्वप्रतिपादनावसरे अन्यत्रोच्यते-

'यद्यपि बहु नाधीषे तथापि पठ पुत्र व्याकरणम्।

स्वजनः श्वजनो मा भूत् सकलं शकलं सकृत् शकृत्'॥ इति।

मोक्षसिद्धौ आद्यसोपानत्वेन व्याकरणस्य माहात्म्यं कथ्यते भर्तृहरिणा वाक्यपदीये-

‘इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम्।

इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः’।। इति।

पतञ्जलिना व्याकरणविषये उच्यते- ‘सर्ववेदपारिषदं हीदं शास्त्रम्’ इति। छान्दोग्योपनिषदि व्याकरणं वेदानां वेदत्वेन निरूप्यते। अतः शब्दब्रह्मस्वरूपसाक्षात्कारस्य साधनत्वेन व्याकरणस्य माहात्म्यं सर्वथा अनस्वीकार्यमिति शिवम्।